M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. /
Ser. 208

Title: Sootamusari Dosha
Shraddha Prayoga

[illegible]

208

Sootrānusāri Darsha Shrāddha Prayoga	Title
	Author
	Editor
	Year, Vols.
	Publisher
208	Remarks

प्राम्वशासूत्रमनुसरसंक्षिप्तपार्वण

स्त्रु·श्रा· श्रीगणेशायनमः अर्थ [redacted] श्राद्धप्रयोगः द्विराचम्य प
१ वित्रेधृत्वा तत्रमंत्रः पवित्रंतेत्र्युक प्राणायामंकृत्वादेशकालौस्मृ
त्वा प्राचीनावीती। अस्मत्पितृपितामहप्रपितामहानांअमुकश
र्मणाममुकगोत्राणांवसुरुद्रादित्यस्वरूपाणांसपत्नीकानांअ
स्मत्मातामहमातुःपितामहमातुःप्रपितामहानांअमुकशर्म
णाममुकगोत्राणांवसुरुद्रादित्यस्वरूपाणांसपत्नीकानां [redacted]
[redacted] अक्षय्यतृप्तिद्वाराश्रीपरमे० दर्शश्राद्धंअन्नेनहविषात्
यः करिष्ये औंतमशुध्यर्थंप्रायश्चित्तार्थंच वैश्वदेवस्त्त्वादिर

पं· तिलोदकंयवोदकंचकृत्वा [redacted] प्रदक्षिणांकुर्यात् समस्त
संपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः॥ अपार
संसारसमुद्रसेतवः पुनंतुमांब्राह्मणपादपांसवः॥ आपद्घ
नध्वांतसहस्रभानवः समीहितार्थार्पणकामधेनवः॥ स
मस्ततीर्थांबुपवित्रमूर्तयोरक्षंतुमांब्राह्मणपादपांसवः॥ वि
प्रोघदर्शनात्क्षिप्रंक्षीयंतेपापराशयः॥ वंदनान्मंगलावाप्ति
रर्चनादच्युतंपदं॥ आधिव्याधिहरंनृणांमृत्युदारिद्र्यनाश
नं॥ श्रीपुष्टिकीर्तिदंवंदेविप्रश्रीपादपंकजं॥ पुरूरवाईव

ॐ तथा

स्तृ.श्रा. संज्ञकविश्वेदेवस्थानेत्वयाक्षणः करणीयः द्वौहेवार्थंनिमंत्र्य
२ प्राचीनावीति अस्मत्पितुः अमुकशर्मणः अमुकगोत्रस्य व
सुरूपस्य सपत्नीकस्य स्थानेत्वयाक्षणः करणीयः एवंपिता
महादिमातुः प्रपितामहांतं उपवीति ब्राह्मणैः पादप्रक्षालनं
रा कृत्वा तैर्हितैर्मनेकृते स्वयंचद्विराचम्य सव्याहृतिगायत्र्यादि
पावमानीभिः पाकप्रोक्षणंकृत्वा देवद्विजोत्राङ्मुखावुपवेश्य
पित्र्यार्थंब्राह्मणानुदङ्मुखानुपवेश्य ~~अस्मत्पितृ~~ देवादि
जहस्तयोरपोदत्वा पुरूरवार्द्रवसंज्ञकानांविश्वेषांदेवानां दू २

दर्भासनं सयवकुशान्प्रागग्रान्देवद्विजदक्षिणभागेदत्वा एव
मुत्तरत्र प्रोक्षितायांभुविकुशोपरिउदकसंस्थपात्रद्वयंनिधायत
त्रिमन्त्रपवित्रेअपआसिच्य शन्नोदेवीइत्यनुमंत्र्य तिलानाव
पति यवोसिधान्यराजोवावारुणोमधुसंयुतः॥ निर्णोदः स
र्वपापानांपवित्रमृषिभिः स्मृतं॥ प्रतिपात्रंमंत्रावृत्तिः॥ गं
धपुष्पाक्षतान्निक्षिप्य॥ सयवहस्तः पुरूरवार्द्रवसंज्ञका
न्विश्वान्देवान्भवत्कआवाहयिष्ये इत्युच्चार्य॥ आवाहयेति
ताभ्यामनुज्ञातः॥ विश्वेदेवासआगतशृणुतामइमंहवं एदं

स्र·श्रा· बर्हिर्निषीदत। प्रति ब्राह्मणं देवाना वाह्य॥ विश्वेदेवाः शृणुतेमं हवं
२ मे ये अंतरिक्षे य उपद्यविष्ठ॥ ये अग्निजिह्वा उत वा यजत्रा आसद्या
स्मिन्बर्हिषि मादयध्वं॥ आगच्छंतु महाभागा। विश्वेदेवा महाबलाः
॥ ये अत्र विहिताः श्राद्धे सावधाना भवंतु ते॥ इत्युपस्थाय स्वाहा
स्त अर्घ्या इति प्रति ब्राह्मणमर्घ्यं निवेद्य तद्धस्तयोरपो दत्वा पात्रस्थं कु
शाद्यर्घ्यं द्विजहस्ते दत्वा पुरूरवार्द्रवसंज्ञकेविश्वेदेवा इदं वो अर्घ्य
मित्यर्घ्यं दत्वा॥ अंते अपो दत्वा एवमुत्तरत्र॥ पुरूरवार्द्रवसंज्ञकवि वा
श्वेदेवाः अमी वो गंधाः॥ इति गंधं दत्वा पुनरपः प्रदाय॥ पूर्ववद्वि ३
स्वाहा

मानि वः पुष्पाणि॥ तथैव धूपः तथैव दीपः इदमाच्छादनं॥ प्रति
पदार्थमाद्यंतयोरपः प्रदानं॥ आग्नेयीमुखः प्राचीनावीती॥ पितृ
ब्राह्मणहस्ते ह्यपो दत्वा॥ अस्मत्पितुः अमुकशर्मणः अमुकगोत्रस्य
वसुरूपस्य सपत्नीकस्य इदमासनं सतिल कुशान्द्विगुणभुग्ना
न्पितृ ब्राह्मणवामभागे दत्वा॥ एवं पितामहादीनामपि॥ पुनरपो
दत्वा प्रोक्षितायां भुवि कुशानास्तीर्य तेषु पात्रषट्कं सपवित्रं नि
धाय तेष्वप आसिच्य शन्नोदेवीरित्यनुमंत्र्य तिलानावपति॥ तिलो
सि सोमदेवत्यो गोसवे देवनिर्मितः॥ प्रत्नवद्भिः प्रत्तः स्वधया पितृनि
मान्लोकान्प्रीणयाहिनः स्वधा नमः॥ इति प्रति पात्रं मंत्रावृत्तिः॥

स्व॰श्रा॰ गंधपुष्पतिलान्निक्षिप्य॥अस्मत्पितृ॰हान् अमुकशर्मणः अ
४ मुकगोत्रान् भवस्तुय थायथं आवाहयिष्ये॥आमंतुनः पितरः सोम्या
उशंतस्त्वानिधीमह्युशंतःसमिधी मोहि॥उशन्नुशतआवहपितृ
न्हविषेअत्तवे॥आमंतुनःपितरःसोम्यासोग्निष्वात्ताः पथिभिर्दैव
यानैः॥अस्मिन्यज्ञेस्वधयामदंतुधिब्रुवंतुतेवंत्वस्मान्॥स्वधा अर्घ्या
संतर्प्याः आपः[redacted]उपवीति॥प्रतिब्राह्मणमर्घ्यपात्रंनिवेद्य॥अपो
दत्वा पात्रस्थकुशद्वयंद्विजहस्तेनिधाय अर्घ्यपात्रोदकंसव्योपं ह
स्तेनादायपितृरिदंतेअर्घ्यमित्यादिप्रतिब्राह्मणमर्घ्यंदानांते
पोदत्वा॥यादिव्याआपःपृथिवीसंबभूवुर्याअंतरिक्षउतपार्थि ४

एवंपितामहादिमातुःप्रपितामहांतंकृत्वा

वीर्याः॥हिरण्यवर्णायज्ञियास्तानआपःशंस्योनाभवंतु॥अने
नप्रतिब्राह्मणहस्तात्स्रवदर्घ्यपोनुमंत्रयं॥मातुःप्रपितामहपात्रेद
त्वाब्राह्मणहस्तकुशान्मातामहपात्रेनिधायतस्मिंस्तज्जलमा
सिच्य॥तथैवपितृपात्रेकृत्वामातामहपात्रोदकंपितृपात्रेदत्वा
पुत्रकामश्चेत्तज्जलेनमुखमंक्त्वातत्पात्रंद्विजोत्तरतोन्युब्जंनिधा
य प्राचीनावी[redacted]त्यपोदत्वा॥अस्मत्पितःअमुकशर्मन्नमुकगो
त्रअमुकरूपसपत्नीक अमीतेगंधाःसुगंधाइतिप्रतिवचनं॥ए स्वधा
वंपितामहादीनामपि॥तथैवपुष्पाणि॥तथैवधूपः॥तथैवदीपः

सोमायपितृमतइदंनमम अग्नयेकव्यवाहनायेदं॰

सू॰श्रा॰ इदमाच्छादनं॥प्रतिपदार्थमाद्यंतयोरर्चनं॥उपवीति॥मंडलोपरि
५ भोजनपात्राणिआसाद्य॥भवदनुज्ञयापाणिहोमंकरिष्ये क्रिय
तां घृताक्तमन्नमादाय॥प्राचीनावीति॥अवदानधर्मेणपित्र्य
ब्राह्मणहस्तेषुमध्येकमवदानद्वयंसोमायपितृमतेस्वधानमो
ग्नयेकव्यवाहनायस्वधानमइतिमंत्राभ्यांहुत्वा॥उपवीति पा
त्राभिघारणंकृत्वाहुतमन्नंपात्रेनिधायाभक्षयित्वैवनिःक्रम्या
चमेयुः ओदनाद्यन्नं परिविष्य॥अग्नौकरणशेषंपित्र्याद्यर्थ
ब्राह्मणपात्रेषुदत्वा॥देवपात्रस्थमन्नं यथाशक्तिसोपस्कारं द ५

प्रोक्ष्य इदमन्नं

त्तंदास्यमानंचास्यब्राह्मणस्यांतृप्तिपर्यंतंस्वाहा हव्यंनमम
विप्रदक्षिणभागेजलंनिक्षिप्य॥एवमितरद्विजे॥प्राचीनावी
ति पितृपात्रमन्नंगायत्र्याभ्युक्ष्यतिलोदकमादायास्मत्पि
त्रेमुकशर्मणेमुकगोत्रायवसुरूपायसपत्नीकायइदमन्नंद
त्तंदास्यमानंचातृप्तिपर्यंतंस्वधाकव्यंनमम॥एवंपितामह
दि॥उपवीति॥ब्रह्मार्पणंकृत्वा॥विष्णवेन्नंसमर्प्य॥एकोविष्णु
र्म॰ ब्राह्मणैरपोशने कृते पितृसूक्तानिराक्षोघ्नसूक्तानि
अन्यांश्चपवित्रमंत्रान्पठेयुः॥पठयेद्वा॥विप्रभोजनांतेपुरूर

सू॰श्रा॰ वाईवसंज्ञक विश्वेदेवास्तत्तास्थ॥ तत्तास्मइतितान्या मिलुक्ते
६ प्राचीनावीति॥ अस्मत्पितर[redacted]त्तत्तास्थेतितान्रख्यात्पा
स्मइतितैरुक्ते॥ मधुवाताऋतायतेमधुक्षरंतिसिंधवः॥ माध्वी
र्नः संत्वोषधीः॥ मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः॥ मधुद्यौ
रस्तुनःपिता॥ मधुमान्नोवनस्पतिर्मधुमांअस्तुसूर्यः॥ माध्वीर्गा
वोभवंतुनः॥ अक्षन्नमीमदंतह्यवप्रिया अधूषत॥ अस्तोषत स्व
भानवोविप्रानविष्ठयामतीयोजान्विंद्रतेहरी॥ इत्युक्त्वा॥ श्राद्धंसं
पन्नमितिपृष्ट्वासुसंपन्नमितितैरुक्ते पिंडार्थमन्नमुद्धृत्य शेषम
न्नंकिंक्रियतामितिपृष्ट्वाइष्टैःसहभुज्यतांतैरुक्ते विप्राणांशुक्षा ६

अथावमनांते पिंडदानंकुर्यात्॥ पितृब्राह्मणभोजनपात्रसमीपे
किंचिद्भूमिमुपालिप्य॥ अपहताअसुरारक्षांसिवेदिषदइति भूये
नदर्भमूलेन वा आग्नेयीसंस्थं प्रत्यगपवर्गं रेखाद्वयमुल्लिख्य
रू तदक्षुक्ष्यसदाछिन्नमास्तीर्यशुंधंतांपितरः सपत्नीकइत्यादि
मावुः प्रपितामहांतानांरेखाद्वयेत्रिषुत्रिषुस्थानेषुजलंदत्वाति
लमधुयुक्तान्नेनषट्पिंडान्कृत्वा एकपिंडमादायएतत्तेअस्म
त्पितः अमुकशर्मन्नमुकगोत्रवसुरूपसपत्नीकयेचत्वामत्रान्वॆ॥
पूर्वरेखायांप्रथमजलसेकस्थानेदत्वा॥ तस्यामेवद्वितीयज
पित्रेमुकशर्मणेमुकगोत्रायवसुरूपायायंतेपिंडःस्वधानमःतेभ्यश्च

पितामहप्रपितामह

स्व॰श्रा॰ लमेकस्थानेदत्वा ॥ एतत्तेपितामह॰ तस्यामेवतृतीयजलमेक
७ स्थानेदत्वा एतत्तेप्रपितामह॰ एवंद्वितीयरेखायांमातामहादि
पिंडान्दत्वा ॥ अत्रपितरोमादयध्वंयथाभागमावृषायध्वेमि
तिपिंडाननुमंत्र्य ॥ सव्यावृदुदङावृत्स्यथात्रात्त्वप्राणंनासि
त्वा अभिपर्यावृत्य अमीमदंतपितरोयथाभागमावृषायीषते
तिपुनरनुमंत्र्य ॥ उपवीति ॥ चरुशेषमवघ्रायाचम्य ॥ प्राचीनावी
ति पूर्ववृक्षुंधतां पितरइत्यादिमंत्रैर्जलंनिनीय ॥ अस्मत्पितः अ
मुकनामन्नमुकगोत्रवसुरूपसपत्नीकअभ्यंक्ष्व एवंपिताम ७

हादिमातुः प्रपितामहांतंषट्सुपिंडेषुदर्भेणतैलंदत्वा ॥ एवंपितः
अंक्ष्वेत्यांजनं ॥ एतद्वः पितरोवासोमानोतोन्यत्पितरोयुङ्ध्वमि
तिनववासोदशांऊर्णास्तुकांवाप्रतिपार्वणंमंत्रावृत्त्यादद्यात् ॥
सव्येमपिंडपूजनं ॥ प्राचीनावीति ॥ अथैनानुपतिष्ठेत ॥ नमोवः पि
तरइषेनमोवः पितरऊर्जेनमोवः पितरः शुष्माय नमोवः पितरो
घोरायनमोवः पितरोजीवायनमोवः पितरोरसाय ॥ स्वधावः
पितरोनमोवः पितरोनमएतायुष्माकंपितरइमाअस्माकंजी
वावोजीवंतइहसंतः स्याम ॥ मनोन्वाहुवामहेनाराशंसेनसो

सू·श्रा· मेन॥ पितॄणांच मन्मभिः॥ आतएतुमनः पुनः क्रत्वेदक्षायजीवसे॥
८ ज्योक्च सूर्यंदृशे। पुनर्नः पितरोमनोददातु दैव्योजनः। जीवंव्रातं
सचेमहि। अथैनान्प्रवाहयेत्॥ परेतनपितरः सोम्यासोगंभीरेभिः
पथिभिः पूर्विणेभिः। दत्वायास्मभ्यंद्रविणेहभद्रंरयिंचनः सर्ववी
रंनियच्छत। उपवीति। जलप्लुतमन्नमादाय देवपात्रसमीपेविकीर्य
। असोमपाश्चयेदेवायज्ञभागविवर्जिताः॥ तेषामन्नंप्रदास्या
मिविकिरंवैश्वदेविकं। प्राचीनावीति। तथैवपितृपात्रसमीपेप्र
कीर्य। असंस्कृतप्रमीतायेत्यागिन्योयाः कुलस्त्रियः॥ दास्या ८

स्वधांवाचयिष्ये वाच्यतामितिविप्रैरुक्ते

मितेभ्योप्रकिरमन्नंताभ्यश्चपैतृकं॥ हस्तंप्रक्षाल्य॥ न्युब्ज
पात्रंविवृत्य॥ उपवीत्याचम्य॥ तांबूलदानानंतरं पितृपूर्वकं दक्षि
णांदत्वा॥ ॐ अस्मत्पितृपितामहप्रपितामहेभ्यः अमुकशर्मभ्यः
अमुकगोत्रेभ्यः वसुरुद्रादित्यस्वरूपेभ्यः सपत्नीकेभ्यः अस्म
न्मातामहमातुः पितामहमातुः प्रपितामहेभ्यः अमुकशर्मभ्यः
अमुकगोत्रेभ्यः वसुरुद्रादित्यस्वरूपेभ्यः सपत्नीकेभ्यः ॐ स्व
धोच्यतामित्युक्त्वा ॐ स्वधेतितैरुक्ते [redacted]
[redacted]। दक्षिणामुखस्तिष्ठन् दातारोनोभिव

स्वधासंपद्यतामितिभवंतोब्रुवंतु
संपद्यतांस्वधा

स॰ श्रा॰ र्धंतां वेदाः संततिरेव नः। श्रद्धा च नो मा व्यगमत्। बहुधेयं च नो
९ स्तु। अन्नं च नो बहु भवेत्। अतिथींश्च लभेमहि। याचतारश्च
नः संतु मा च याचिष्म कंचन। इति ब्राह्मणान्संप्रार्थ्य।। अ
था स्वस्तिरिति तैरुक्ते।। [redacted]ति।। यस्य स्मृत्येत्युक्त्वा।। विष्णु
स्मरणं कुर्यात्।। पिंडान्जले निक्षिप्य।। गोअजविप्रेभ्यो वा
दद्यात्।। सूत्रानुसारी दर्शश्राद्धप्रयोगः समाप्तः।।